# महालक्ष्मीसंहितायां
# वासुदेवकल्पः

(YOGA SECTIONS: Verses 396-405, 431–476)

लक्ष्मीरुवाच ।
मन्त्रं तन्त्रं विभो ज्ञानं पूजाहवनपूर्वकम् ।
ज्ञातं मे त्वत्प्रसादेन यत्सुरैरपि दुर्लभम् ॥ ३९६ ॥

येन वै प्राप्यते ज्ञेयं मन्त्रं (27^r)करणसंस्थितम् ।
योगं योगवतां श्रेष्ठ तं वदस्व सुखावहम् ॥ ३९७ ॥

भगवानुवाच ।
विविक्ते भूप्रदेशे च निर्द्वन्द्वे शुभलक्षणे ।
निःशब्दे विजने शून्ये स्थाने दोषविवर्जिते ॥ ३९८ ॥

संस्थितः सुखमासीनः सत्त्वैकगतमानसः ।
विरक्तः शान्तचित्तश्च संसारानलतापितः ॥ ३९९ ॥

पद्मपद्मासनासीनो ब्रह्मज्ञानहृदोपगः ।
ऋजुकायस्थितश्चैव किञ्चिन्मीलितलोचनः ॥ ४०० ॥

जिह्वा तालुतले योज्या दन्तैर्दन्तान्न संस्पृशेत् ।
तत्त्वग्रामं च संहृत्य शून्ये बोधे नियोजयेत् ॥ ४०१ ॥

निशाम्बुकणसंकाशं मार्तण्डायुतदीपितम् ।
शशांकशतसंकाशं कालान्तहुतभुग्बलम् ॥ ४०२ ॥

---

**396** तन्त्रं विभो ] *em.*; तन्त्रन्त्रम्वैभो MS • मे ] *em.*; म MS **397** प्राप्यते ज्ञेयं मन्त्रं ] *conj.*; प्राप्ते ज्ञेय मन्त्र MS(unmetrical) • श्रेष्ठ ] *em.*; श्रेष्ठस् MS • सुखावहम् ] *conj.*; सुराहं MS **398** निःशब्दे ] *em.*; निःशब्द MS **399** सुखमासीनः सत्त्वैक° ] *em.*; सुखासीनः सत्त्वेक° MS • °तापितः ] *em.*; °तापित MS **400** किञ्चिन्मीलित° ] *em.*; किञ्चिन्मील° MS **401** °तले ] *em.*; °तलो MS • दन्तैर्दन्तान्न सं° *em.*; दन्तैदन्तानन्सं° MS^pc; दन्तैदन्तान्सं° MS^ac **402** °दीपितम् ] *em.*; °दापिकं MS • °भुग्बलम् ] *em.*; °भुक्बलम् MS

निर्वाणयोगमातिष्ठेद्ध्यात्वा सर्वं विभावितम् ।
परानन्दरसैस्तृप्तं सामरस्यात्मनिर्भरम् ॥ ४०३ ॥

ऊर्ध्वनाडीपथे यातो भेदयित्वा महाबिलम् ।
मुहूर्तमपि यस्तिष्ठेल्लब्ध(27v)लक्ष्यः प्रसन्नधीः ।
तेन सर्वाणि नीतानि विष्णुलोके कुलानि तु ॥ ४०४ ॥

पुण्यपापविनिर्मुक्तो ऽप्यविद्यानिचयैस्तथा ।
देहान्ते समवाप्नोति सो ऽथ ब्रह्मणि सात्म्यताम् ॥ ४०५ ॥

लक्ष्मीरुवाच ।
प्रलयान्ते जगत्सर्वमुपसंहारयोगतः ।
लीयन्ते च प्रजाः सर्वा मूर्ताश्चामूर्तलक्षणाः ॥ ४०६ ॥

मुक्ताश्चैवाप्यमुक्ताश्च ह्येकीभावत्वमागताः ।
कुर्वाणस्त्वं पुनः सृष्टिं सृजेः सर्वा इमाः प्रजाः ॥ ४०७ ॥

गमागमे नियुक्ताश्च साध्यन्ते तत्त्ववित्सया ।
मोक्षस्य त्वनवस्थानं जन्तूनां च प्रवर्तनम् ॥ ४०८ ॥

विरुद्धमेतद्देवेश मनसश्च विमोहनम् ।
त्वदन्यः संशयस्यास्य छेत्ता नैवोपपद्यते ॥ ४०९ ॥

बोधो मे मोहमापन्नः संशयानलखेदितः ।
सन्देहार्णवमग्नानामतश्चोद्धरणं कुरु ॥ ४१० ॥

भगवानुवाच ।
परतत्त्वस्य कथनाद्दग्धबीजा निराश्रयाः ।

---

**403** °तिष्ठेद्ध्यात्वा सर्वं वि° ] *conj.*; °तिष्टेत्सर्वम्विसर्वम्वि° MS • °स्तृप्तं ] *em.*; °स्तप्तं MS **404** °लक्ष्यः प्रसन्नधीः ] *em.*; °लक्ष प्रसन्नधी MS • °बिलम् ] *em.*; °बलम् MS **405** °यैस्तथा ] *em.*; °येस्तथा MS • समवाप्नोति ] *conj.*; तवाप्नोति MS **406** °संहारयोगतः ] *em.*; °संरियोगतः MS • मूर्ताश्चा° ] *em.*; मूर्त्ताश्चा° MS **407** °स्त्वं पुनः सृष्टिं सृजेः सर्वा ] *em.*; °स्त्व पुनः सृष्टिः सृजेत्सर्वा MS **408** जन्तूनां ] *em.*; जन्तूणां MS **409** छेत्ता ] *em.*; छेता MS **410** °खेदितः ] *em.*; °खेतितः MS **410** °मतश्चोद्धरणं ] *conj.*; °मतिश्चोद्धराणि MS **411** °नाद्दग्ध° ] *em.*; °नादग्ध° MS • °श्रयाः ] *em.*; °श्रया MS • क्षीराद्घृतमिवापन्नं ] *em.*; क्षीराघृतमिवापन्ना MS

क्षीराद्घृतमिवापन्नं पुनः क्षीरं न याति च॥ ४११॥

ज्ञानाग्निदग्धकर्माणो न तेषां पुनरुद्भवः।
प्रलये (28r)संप्रतिष्ठा ये त्वज्ञानतिमिराहताः॥ ४१२॥

सृष्टिमार्गेण ते सर्वे संसरन्ति पुनः पुनः।
इत्येतल्लक्षणं तेषां पशूनां न्यग्विवर्तनम्॥ ४१३॥

लक्ष्मीरुवाच।
त्वत्प्रसादेन मे नाथ [ज्ञा]तमज्ञाननाशनम्।
शास्त्रं पापहरं पुण्यमपवर्गफलप्रदम्।
इदानीं श्रोतुमिच्छामि सुशुभं मन्त्रजं फलम्॥ ४१४॥

भगवानुवाच।
यो नित्यं जपते मन्त्रं पूजयेज्जुहुयात्तथा।
नरो वा यदि वा नारी कन्या वापि कुमारकः।
सर्वसौभाग्यसंपन्नो मोक्षलक्ष्मीमवाप्नुयात्॥ ४१५॥

लक्ष्मीरुवाच।
साधकस्य च विघ्नानि जायन्ते बहवस्तथा।
भक्तियुक्तस्य देवेश नित्याभ्यासरतस्य च॥ ४१६॥

क्रियासक्तस्य च विभो सत्कर्मणि रतस्य च।
निवार्यन्ते तु सर्वेश यथा वद तथा प्रभो॥ ४१७॥

भगवानुवाच।
शृणु देवि प्रवक्ष्यामि रक्षां सर्वसुखप्रदाम्।
कर्पूरं मृगजं चैव चन्दनं कुङ्कुमं तथा॥ ४१८॥

गोरोचनां गन्धपत्राणि हरितालं म(28v)नःशिलाम्।
निशाम्बुना निघृष्टं च कृत्वा पात्रे ऽथ राजते॥ ४१९॥

---

**412** °कर्माणो ] *em.*; °करमाणो MS **413** सर्वे ] *em.*; सर्व MS • पशूनां न्यग्वि° ] *em.*; पशूना न्यग्वि° MS **414** इदानीं ] *em.*; इदानी MS • सुशुभं ] *em.*; सुशुभ MS **415** जपते ] *em.*; जप्ते MS • सर्व° ] *em.*; सत्त° MS **418** रक्षां ] *em.*; रक्ष MS • °प्रदाम् ] *em.*; °प्रदा MS • °रं मृगजं चैव चन्दनं ] *em.*; °र मृगजाञ्चैव चन्दन MS

लिखेच्छ्रीवृक्षलेखन्या सुसिते नेत्रकर्पटे।
कमलं चाष्टपत्रं च केसरालं सकर्णिकम्॥ ४२०॥

तन्मध्ये साध्यसंज्ञां तु कुर्यान्मन्त्रविदर्भिताम्।
सकारान्तर्गतां चैव वकारोदरमध्यगाम्॥ ४२१॥

प्रणवेन त्रिधावेष्ट्य त्रिधावेष्ट्य चतुष्कलम्।
मायया त्रिगुणं बाह्ये तद्बाह्ये कर्णिकोत्तमम्॥ ४२२॥

केसरेषु च सर्वेषु गायत्रीं विनिवेशयेत्।
पत्रेषु च यथार्चायां लिखेदङ्गान्यनुक्रमात्॥ ४२३॥

स्वरैः षोडशभिर्युक्तं [त]द्बाह्ये चक्रमुत्तमम्।
षोडशारं त्रिनाभिं च त्रिनेमिं परिकल्पयेत्॥ ४२४॥

तद्बाह्ये चतुरस्रं तु पार्थिवं स लिखेत्पुरम्।
वज्रबीजाष्टकोपेतं पुष्यार्के च समालिखेत्॥ ४२५॥

पूर्णायां शशिवारे च लग्ने ऽप्यभिजि'संज्ञके।
स्नातः शुक्लाम्बरो भूत्वा पूर्वाशासंमुखः स्थितः॥ ४२६॥

सुलिख्य च महारक्षां ततः सूत्रेण वे(29r)[ष्ट]येत्।
त्रिलोहवेष्टितं कृत्वा बाह्वोर्वा कण्ठतो ऽपि वा॥ ४२७॥

योजयेद्विघ्नशान्त्यर्थं सर्वदोषनिवृत्तये।
धारणान्मन्त्रनाथस्य दौर्भाग्यं विजहाति वै॥ ४२८॥

वन्ध्यायां सन्तति(र्भू)यात्कन्या च पतिमाप्नुयात्।
अभार्यो लभते भार्यां हृद्यां च प्रियवादिनीम्॥ ४२९॥

---

**420** °लेखन्या ] *em.*; °लेखन्य MS **421** तत्मध्ये ] *em.*; तन्मध्ये MS • °संज्ञां ] *em.*; °संज्ञा MS • °र्गतां चैव ] *em.*; °र्ग्गत सेव MS • °मध्यगाम् ] *em.*; °मध्यगा MS **422** °न त्रिधावेष्ट्य त्रिधावेष्ट्य ] *conj.*; °नात्रधावेष्ट त्रिधावेष्ट MS • °कोत्तमम् ] *em.*; °कातमं MS **423** गायत्रीं ] *em.*; गायत्री MS **424** °नाभिं च त्रिनेमिं ] *em.*; °नाभ्यञ्च त्रिनेपि MS **426** °जित्संज्ञके ] *em.*; °जिसंज्ञते MS • °शासंमुखः ] *em.*; °शांसंमुख MS **427** °रक्षां ] *em.*; °रक्षा MS • बाह्वोर्वा कण्ठतो ऽपि ] *em.*; बांकोर्व्वा कण्ठतोदपि MS **428** धारणान्मन्त्र° ] *em.*; धारणात्मन्त्र° MS **429** °यात्कन्या च पति° ] *em.*; °त्वा कन्या च प्रति° MS

इदं शास्त्रं वरं पुण्यं यस्य तिष्ठति वेश्मनि।
तस्य सर्वार्थसंपत्तिः सु[स्थि]रं संप्रजायते॥ ४३०॥

लक्ष्मीरुवाच।
एवं योगस्त्वया देव कथितः परमेश्वर।
अधुना श्रोतुमिच्छामि जीवोत्क्रान्तिविनिर्णयम्॥ ४३१॥

भगवानुवाच।
पुरा कुलक्रमज्ञानं शरीरं नाडिगोचरम्।
द्वासप्ततिसहस्राणि नाडयो देहमास्थिताः॥ ४३२॥

ताश्चैता नाडयो मध्याच्छतमेकोत्तरं परम्।
तिर्यगूर्द्ध्वाधःस्थवाहा शरीरे ऽन्तर्गताश्च ताः॥ ४३३॥

इडा चैव सुषुम्ना च पिङ्गला च तृतीयका।
गन्धारी हस्तिजिह्वा च पूषा चैव यशा तथा॥ ४३४॥

अलंबुषा कुहुश्चैव शंखिनी दशमी स्मृता।
(29$^{v}$)दशैताः प्राणवाहिन्यो नाडयः परिकीर्तिताः॥ ४३५॥

त्रितयं तत्समूहाच्च ज्ञातव्यं सूक्ष्मरूपकम्।
सौषुम्णा च इडा मार्गे स्थिता दक्षिणकोत्तरम्॥ ४३६॥

तयोः संघट्टयोगाच्च स्थिता चोर्ध्वप्रवाहिनी।
सुसूक्ष्मा परमा गुह्या परव्योमान्तयायिनी॥ ४३७॥

पिंगला नाम समाख्याता ऊर्ध्वाधो दण्डवत् स्थिता।
तन्निबद्धानि वर्तन्ते सप्तसिराशतानि च॥ ४३८॥

नवस्नायुशतैर्युक्तं शरीरं भूतपञ्जरम्।
त्रिस्थानं सप्तकाधारं षट्चक्रं षोडशात्मकम्॥ ४३९॥

---

**431** °गस्त्वया देव कथितः ] *conj.*; °गं त्वया देव कथितं MS **433** ताश्चैता ] *conj.*; ताश्चता MS **435** दशैताः ] *em.*; दशेते MS **436** तत्समूहाच्च ] *em.*; तत्समूहाश्च MS • सौषुम्णा ] *conj.*; सौषुम्ने MS **437** °घट्टयोगाच्च ] *em.*; °घट्टनंयोगाच्च MS • गुह्या परव्योमान्तयायिनी ] *em.*; गुह्य परमव्योमान्तयायनी MS **438** ऊर्ध्वाधो दण्डवत् स्थिता ] *em.*; रूद्धाधो दण्डवत्किता MS • सप्तसिराशतानि ] *conj.*; सप्ताशिराःशतानि MS **439** त्रिस्थानं ] *em.*; त्रिस्थूनं MS

लक्ष्मीरुवाच।
का' स्थाना' के तथाधाराः षट्चक्रं षोडशात्मकम्।
एतदाख्याहि देवेश यत्त्वया परिचोदितम्॥ ४४०॥

भगवानुवाच।
वातः पित्तं कफश्चेति त्रिस्थानं धार्यते पुरम्।
मेदो मांसं चासृङ्मज्जा शुक्रं चैवात्र पञ्चमम्।
अन्नपानसमोपेताः सप्तैते धारणात्मकाः॥ ४४१॥

मूर्ध्नि तालुगते कण्ठे हृद्देशे नाभिपुष्करे।
तथा वै कन्दपर्यन्ते षट्चक्रं च व्यवस्थितम्॥ ४४२॥

प्रथमं मू(30r)र्ध्नि चक्रं च नीरूपं भासुराकृति।
तत्रस्थमीक्षते जीवः परं परमनायकम्॥ ४४३॥

तदधस्तालुचक्रं च भ्रुवोरन्तर्गतं मतम्।
तत्र जीवो वसत्यात्मा पश्येद्विश्वं चराचरम्॥ ४४४॥

कण्ठचक्रे वसेद्यत्र जिह्वामूले निराकृतिः।
प्राप्नोति परमां तृप्तिं षड्रसप्रभवात्मिकाम्॥ ४४५॥

हृच्चक्रे कुहरे ह्यात्मा स्थितं तच्चित्स्वरूपि (च)।
वेत्ति सर्वं क्रमं तत्र शारीरं यद्व्यवस्थितम्॥ ४४६॥

नाभिचक्रे स्थितश्चैव त्रिकोणे त्रिगुणात्मके।
तेजआत्मा स भगवान् पचत्यन्नं चतुर्विधम्॥ ४४७॥

कन्दचक्रं यदायातं तत्र नाडीत्रयान्वितम्।

---

**440** का' स्थाना' ] *conj.*; का स्थूना MS • °धाराः ] *em.*; °धारा MS **441** वातः पित्तं कफश्चेति ] *em.*; वातायत्तं कफाश्चैति MS • मेदो मांसं चासृङ्मज्जा ] *em.*; मेद मान्सञ्चसृग्मज्जा MS **442** तालुगते ] *em.*; तालुगले MS • °पुष्करे ] *em.*; °पुष्करेः MS **443** नीरूपं ] *em.*; निरूपं MS • °कृति ] *em.*; °कृति MS • जीव ] *em.*; जीवः MS **444** पश्ये° ] *em.*; पश्वे° MS **445** कण्ठचक्रे ] *conj.*; कण्ठे चक्रे MS • प्राप्नोति ] *em.*; प्राप्नौति MS • °प्रभवा° ] *em.*; °प्रभावा° MS **447** °चक्रे ] *conj.*; °चक्र MS • भगवान् पचत्य° ] *em.*; भवान् पचत्य° MS **448** °चक्रं यदायातं ] *conj.*; °चक्रे यदाजातं MS • °गो देवः ] *em.*; °गन्देवं MS • °नन्दिनि।] *em.*; °नन्दिनो MS

षोडशात्मकरूपं च कलया संयुतं च यत्।
तत्कन्दे सर्वगो देवः कलात्मा कुलनन्दिनि॥ ४४८॥

नाडीत्रयं प्रेरयति ह्युत्सर्गकरणं प्रति।
शुक्रशुक्ररसावाहा तिस्रस्ताः परिकीर्तिताः॥ ४४९॥

चरते चक्रनाथश्च भुङ्क्ते भोगानशेषतः।
(30v)षोडशात्म स्वकं रूपं कलया संयुतं च यत्।
तत्कन्दे सर्वगो देवः कलया कुलनन्दने॥ ४५०॥

यदा सर्वपदार्थानां त्यागं शक्नोति नैव सः।
तदानन्दरसाव्याप्तेर्ज्ञातव्या मोक्षभूमिका।
कलाभिः षोडशैर्युक्तं तन्नामान्यथ मे शृणु॥ ४५१॥

यूथा यशा सुमनसा प्रीतिस्तुष्टिकरी तथा।
तथा प्रीतिकरी सौम्या मारीची'प्यंशुमालिनी॥ ४५२॥

स्रंसिनी मोहिनी च्छाया लक्ष्मीः संपूर्णमण्डला।
अमृता तु समाख्याता चिच्छक्ति[र्यो]पबृंहते॥ ४५३॥

षोडशात्म स्वकं रूपं कलया संयुतं च यत्।
उक्तं ते सर्वगो देवः कलया कुलनन्दिनि।
चित्स्वभावगुणावस्थो भुङ्क्ते वै सज्जिकान्गुणान्॥ ४५४॥

शब्दानन्दश्च विज्ञेयः स्पर्शानन्दस्त्वतः परम्।
रूपानन्दो रसानन्दो गन्धानन्दश्च पञ्चमः॥ ४५५॥

पञ्चानन्दमयं चक्रं पञ्चारं संव्यवस्थितम्।
(31r)तत्रानन्दरसाव्याप्तिर्वेत्ति सर्वं यथास्थितम्॥ ४५६॥

---

**449** °यति ह्युत्सर्ग° ] *em.*; °यतीत्युत्सर्ग्ग° MS • तिस्रस्ताः ] *em.*; त्रिस्रस्ताथ MS **450** °श्च भुङ्क्ते भोगान° ] *em.*; °श्च भुक्ते भोगान्य° MS • स्वकं ] *em.*; स्वक MS • सर्वगो देवः ] *em.*; सर्व्वगन्देवे MS **451** °पदार्था° ] *em.*; °पादार्था° MS • कलाभिः षोडशैर्युक्तं ] *em.*; कलया षोडशेयुक्तं MS **452** सौम्या ] *em.*; सोम्या MS **453** लक्ष्मीः ] *em.*; लक्ष्मी MS • अमृता तु ] *em.*; अमृतास्तु MS **454** सर्वगो देवः ] *em.*; सर्वसं देव MS • °वस्थो ] *em.*; °वस्था MS **455** शब्दानन्दश्च ] *conj.*; शब्दनादश्च MS • विज्ञेयः ] *em.*; विज्ञेय MS **456** पञ्चारं ] *em.*; पञ्चार MS • °व्याप्तिर्वेत्ति सर्वं ] *em.*; °व्याप्तिवेत्ति सर्व्वं MS

पिपासां तोयपानाच्च क्षुधितस्यैव भोजनात्।
निदाघे मारुतस्पर्शाच्छीते ऽनलसमागमात्॥ ४५७॥

तमआद्यस्य चालोकाद्वियोगे प्रियसंगमात्।
स्त्रीपुंसोः संप्रयोगाच्च षड्रसास्वादनादपि॥ ४५८॥

चित्तवृत्तिनिरोधाच्चाप्येकाग्रसमताश्रयात्।
विकल्पमलसंत्यागात्सर्वारम्भनिरासहम्।
लभ्यते यत्सुखं साम्ये तदा मोक्षो ऽपि लभ्यते॥ ४५९॥

आनन्दं ब्रह्मणो रूपं तस्मात्तं पर्युपासते।
तादात्म्यं प्राप्यते तेन विघ्नपाते न संशयः॥ ४६०॥

भोगायतनमित्युक्तं शरीरं सर्वदेहिनाम्।
स्वदेहकुलमात्मानं ज्ञात्वा यत्कौलमुच्यते॥ ४६१॥

सर्वज्ञानरतः शुद्धः सर्वदानरतात्मकः।
न तत्स समवाप्नोति वेत्ति यो भौतिकं पुरम्॥ ४६२॥

सर्वपापरतश्चैव सर्वकर्मपरिच्युतः।
अन्ते ऽशारीरभावं च (31v)वेत्ति यः सो ऽपि सज्जनः।
सर्वकर्मविनिर्मुक्तो विशेत्सो ऽप्यमलं पदम्॥ ४६३॥

पिण्डं परिणतं ज्ञात्वा जरया जर्जरीकृतम्।
अशक्तः सर्वकार्येषु इन्द्रियार्थं न वेत्त्यपि॥ ४६४॥

रसास्वादविनिर्मुक्तं स्खलते कम्पते यदा।
तदा तेन प्रकर्तव्या मतिरुत्क्रामणं प्रति॥ ४६५॥

आदौ तु सकलं भावं तत्सर्वं संपरित्यजेत्।

---

**457** °च्च क्षुधित° ] *em.*; °ञ्च क्षुभित° MS **458** तमआद्यस्य ] *conj.*; तमाद्यन्तस्य MS **459** °निरासहम् ] *em.*; °निरासह MS **460** तादात्म्यं प्राप्यते ] *conj.*; तदात्माम्प्राप्यते MS **461** °मात्मानं ] *em.*; °मातं MS **462** °ज्ञानरतः शुद्धः ] *conj.*; °ज्ञरतः सुधीः MS • भौतिकं ] *em.*; भौक्तिकं MS **463** °पापरत° ] *em.*; °पापपरत° MS • °विनिर्मुक्तो ] *em.*; °विनिर्म्मुक्त MS **464** जरया ज° ] *em.*; जरयजि° MS • वेत्त्यपि ] *em.*; वेत्यपि MS **465** °विनिर्मुक्तं ] *em.*; °विनिर्मक्तं MS • °णं प्रति ] *em.*; °णम्पति MS

सोपानपदवी तत्र ज्ञातव्या तत्त्वसंस्थितिः॥ ४६६॥

षड्विंशपदसंयुक्ता तया चोर्ध्वं प्रयाति च।
ॐकारमुच्चरेत्पूर्वं ततो ऽपानं समाहरेत्॥ ४६७॥

नासाग्रेणानलं क्षिप्य हृदयं पूरयेत्ततः।
पूरितं न त्यजेद्बाह्ये तदूर्ध्वं च नियोजयेत्॥ ४६८॥

प्रोत्थितं हृद्गतं जीवं व्रजेन्नाडिपरम्परम्।
तालुद्वारं समासाद्य ब्रह्मद्वारं विभेदयेत्॥ ४६९॥

ततोद्घातैस्त्रिभिश्चैव भेदयेत्पिङ्गलाश्रितम्।
मनःशारङ्गकं गृह्य बोधशक्तिः शरात्मिका॥ ४७०॥

तया विबोधितं कृत्वा ब्रह्मरन्ध्रगुहाश्रितम्।
(32r)चित्तं लक्ष्यस्थितं कृत्वा संलीनः शाश्वते पदे॥ ४७१॥

भित्त्वा मन्त्रवरं चोग्रं विनिर्गत्य पुरात्ततः।
सूर्यकोटिसहस्राभं शतचन्द्रगभस्तिमत्॥ ४७२॥

यदेतद्ब्रह्मणो रू[पं]तद्विष्णोः परमं पदम्।
तत्प्रविष्टं निराभासं जीवं चिन्मूर्तिलक्षणम्॥ ४७३॥

शून्ये शून्यत्वमापन्ने क्षीरे क्षीरार्पणं यथा।
तज्जीवं परमानन्दमेकीभावत्वमागतम्॥ ४७४॥

ततः सायोज्यमायाति यत्राहमपुनर्भवः।
एतत्सर्वं समाख्यातं तव चोत्क्रान्तिलक्षणम्॥ ४७५॥

सर्वपापक्षयकरं सर्वोपद्रवशान्तिदम्।
यस्त्वेवं भावसंभावं वेत्ति सम्यक् शृणोति वा।

---

**467** ऽपानं ] *em.*; ऽपान MS **468** °दूर्ध्वं च ] *em.*; °दूर्द्धञ्च MS **469** प्रोत्थितं ] *em.*; प्रोण्वितं MS • व्रजेन्नाडि° ] *em.*; वज्रेन्नाडि° MS **470** °श्रितम् ] *em.*; °श्रिता MS • °रङ्गकं ] *em.*; °रङ्गको MS **471** °रन्ध्रगुहाश्रितम् ] *em.*; °रन्ध्रं गुहाश्रियं MS • लक्ष्य° ] *em.*; लक्ष° MS • संलीनः ] *em.*; संलीन MS **472** °गभस्तिमत् ] *em.*; °गभस्तिमम् MS **473** चिन्मूर्त्ति° ] *em.*; चेत्मूर्त्ति° MS **474** °रार्पणं ] *em.*; °राप्पणं MS **476** °पापक्षयकरं ] *em.*; °पापंक्षयंकरं MS

सर्वपापविनिर्मुक्तः प्रविशेत्परमं पदम्॥ ४७६॥

महालक्ष्मीसतत्त्वे च तन्त्रे ज्ञानक्रियात्मके।
उक्तं वै वासुदेवस्य कल्पं स्त्रीपुंसलक्षणम्।
सुखसौभाग्यदं नित्यं रूपं ते चारुभाषिणि॥ ४७७॥

एतच्छास्त्रवरं पुण्यं पवित्रं भोगमो(32v)क्षदम्।
स्मरणाद्धारणाद्ध्यानाद्विष्णोः सायोज्यतां व्रजेत्॥ ४७८॥

इति पञ्चरात्रे महालक्ष्मीसंहितायां वासुदेवकल्पः समाप्तः॥ ०॥

---

**476** प्रविशेत् ] MS$^{pc}$; प्रवित् MS$^{ac}$ **477** °सतत्त्वे च ] *conj.*; °सगन्धा च MS **478** • Colophon: °कल्पः समाप्तः ] *conj.*; °कल्पं समाप्तम् MS • The scribe's colophon is as follows: सम्वत् ३७२ चैत्रकृष्णद्वादशी। सोमवासरे। श्रीमत्राजाधिराजःपरमेस्वरःश्रीश्री-अभयमल्लदेवविजयराज्ये। श्रीमानीगुलयोयकोगृहाधिवासिनीऊगौभारोसन लिखितमिदं॥ ०॥ ० ॥